International Journal of Sanskrit Research 2023; 9(2): 105-106

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(2): 105-106
© 2023 IJSR
www.anantaajournal.com
Received: 16-12-2022
Accepted: 20-01-2023

**पुष्पिता नन्दी**
संस्कृतपालिप्राकृतविभागः, भाषाभवनम्, विश्वभारती, शान्तिनिकेतनम्, पश्चिमवङ्गम्, भारतः।

**पुष्पश्री नन्दी**
संस्कृतविभागः,वर्धमानविश्वविद्यालयः,वर्धमानः, पश्चिमवङ्गम्, भारतः।

**Corresponding Author:**
**पुष्पिता नन्दी**
संस्कृतपालिप्राकृतविभागः, भाषाभवनम्, विश्वभारती, शान्तिनिकेतनम्, पश्चिमवङ्गम्, भारतः।

# उपनिषदि स्वप्नतत्त्वम्

**पुष्पिता नन्दी, पुष्पश्री नन्दी**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i2b.2038

**सारांश**
मानवजीवने स्वप्न एकः परिचितः शब्दः। य वस्तुतः मिथ्या एव कल्पनामात्रः। परन्तु दर्शनशास्त्रे स्वप्नः अतिगुरुत्वपूर्णः विषयः। य आत्मनः अवस्था एव। परमात्मनः तथा हिरण्यगर्भस्य मानसिकपर्यायः स्वप्नः। वेदे यदग्निहोत्रयागसदृशम्। उपनिषदि आत्मनः द्वितीयपादरूपेण स्वप्नावस्था निरूपिता। सा स्वप्नावस्था आन्तःप्रज्ञा एव। वास्तविकजीवने यः स्वप्नः मिथ्यामात्रः उपनिषदि तस्य सत्यत्वम् अत्र उपस्थापितम्।

**कूटशब्द :** दर्शनशास्त्रे स्वप्नः, स्वप्नः, मिथ्यामात्रः

## प्रस्तावना

दिवा रात्रि च विश्वसृष्ट्याः मूलम्। वेदे अपि आम्नातम्-

> "अहोरात्राणि वेदधद्विश्वस्य मिषतो वशी"१ इति।

अहोरात्रयोः प्रभावेन परिव्याप्तः मानवजीवनः। दिवाकाले जाग्रदवस्थायां कर्मेन्द्रिये ज्ञानेन्द्रिये च सक्रियत्वे मानवमनसि ज्ञानं संस्कारञ्च उत्पादयति। निद्राकाले मानवानां स्वप्नः सुषुप्तिः चेति अवस्थाद्वयम्। अतः जाग्रत् स्वप्नः सुषुप्तिः इत्येव मानवानाम् अवस्थात्रयम्। तत्र स्वप्नदशायां मानवानाम् इन्द्रियाणां निष्क्रियत्वेऽपि अन्तरिन्द्रियस्य मनसः तु सक्रियत्वम्। मनसा एव स्वप्नः अनुभूयते। स्वप्नः मनसः धर्म एव। अतः उपनिषदि कथितमस्ति-

> "अत्रैष देवःस्वप्नः महिमानमनुभवति" २ इति।
>
> अपिच "एवं हवै तत् सर्वं पेर देते मनस्येकीभवति" ३ इति।

रङ्गरामानुजाचार्येणापि उक्तम्- "यत्र स्थित्वा जीवः स्वप्नपदार्थान् पश्यति तत् स्वप्नस्थानं तदेव स्थानं यस्य स स्वप्नस्थानः" ४ इति।

स्वाप्निकावस्थायाम् अनुभूतविषयाणां सत्यत्वेऽपि जागरणे एव स्वप्नानुभूतः विषयः मिथ्यात्वेन पर्यवसते। अतः स्वप्नः मिथ्याभूतः। स्वप्ने मिथ्यात्वे सति उपनिषदि तु अध्यात्मविद्यायाम् उपस्थापनावसरे स्वप्नस्थानमधिकृत्य स्वप्नतत्त्वम् आलोचितम्।

### स्वप्नस्य स्वरूपम्

कः स्वप्नः? किञ्चतस्य स्वरूपम्? इति जिज्ञासायामुच्यते जाग्रद्दशायां मानवानाम् अनुभूतविषयाणां संस्कारः मनसि तिष्ठति। इन्द्रियव्यातिरिक्तेन ज्ञानजन्यसंस्कारेण यत् विषयानुभवः तदेव स्वप्नः। अतः शङ्कराचार्येनोक्तम्- "जागरितसंस्कारजः प्रत्ययः सावयवः स्वप्नः" ५ इति।

उपनिषदि अपि श्रूयते- "अत्रैष देवः स्वप्ने महिमानमनुभवति। यत् दृष्टं दृष्टमनुपश्यतिए श्रुतं श्रुतमेवार्थम् अनुशृनोतिए देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति। दृष्टं चादृष्टं चए श्र्यतं चाश्रुतंए अनुभूतं चाननुभूतञ्च सर्वं पाश्यतिए सर्वह् पश्यति।" ६ इति।

स्वप्नो नाम जाग्रद्दर्शनात् निवृत्तस्य जाग्रद्वद् अन्तःशरीरे यद्दर्शनम्। मान्डूक्योपनिषदि टीकायां श्रीनृत्यगोपालपञ्चतीर्थेनापि कथितमस्ति- "स्वप्नस्थानः निद्रादशाधिष्ठितः एषः आन्तःप्रज्ञः जाग्रद्दशयाऽभुक्तविषयाणां संस्कारोपहितमनोमात्रेण ज्ञेयः" [७] इति।

स्वप्नस्वरूपप्रसङ्गे शङ्करचार्येणोक्तम्- "करणूअरमे जाग्रत्संस्कारोत्थं प्रबोधवत् ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते" [८] इति।

**उपनिषदि स्वप्नः**

ऐतेरेयोपनिषदि श्रुयते- "तस्य त्रय अवस्थास्त्रयः स्वप्नाः" [९] इति।

अत्र जाग्रत्-स्वप्न-सुषुप्ति इति अवस्थात्रयमेव स्वप्नः। शङ्करचार्येण सत्तात्रयं स्वीकृतम्- प्रातिभासिकी व्यावहारिकी पारमार्थिकी च। सुषुप्तिस्वप्नयोः प्रातिभासिकी सत्ता ज्ञानमात्रकालिनीत्वात्। जाग्रदवस्थायाः व्यावहारिकी सत्ता। ब्रह्मतत्त्वज्ञाने च पारमार्थिकी सत्ता। सुषुप्तिस्वप्नकालीनवस्तुनः सत्यत्वानुभवे अपि जागरणे मिथ्यात्वसिद्धिः। व्यवहारकाले जगतः स्त्यत्वावबोधे अपि आत्मज्ञाने जगतः मिथ्यात्वोपपत्तिः भवति। अतः पारमार्थिकोसत्ताभावे जगतः यथा सत्यत्वं तथा स्वप्नस्यापि नालीकत्वम्।

स्वप्नावस्थामाश्रित्य मानवः आनन्दं पापपुण्यम् अनुभूयते परलोकञ्च आप्नोति [१०]। स्वप्नावस्थायां पुरुषः कामनावासनारहितत्वेन पापरहितेन च तिष्ठति। अतः उपनिषदि आम्नातम्-"तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं स्गोकान्तरम्" [११] इति।

तत्र एव पिता अपितारूपेण माता अमातारूपेण लोकश्च अलोकरूपेण तिष्ठति। पुरुषः सर्वस्मात् शोकात् उद्धरति। अतः उपनिषदि- "अत्र पिताऽपिताभवति माताऽमातालोका अलोका देवा अदेवा वेदा अवेदा। अत्र स्तेनोऽस्तेनो भवति। भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डामः पौल्क्सोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनान्वागतं पापेन तीणो हि तद सर्वाञ्छोकान् हृदयस्य भवति" १२ इति।

माण्डूक्योपनिषदि आत्मनः चतुष्पाद् स्वीक्रियते। अतः "सर्वं ह्येतद्ब्रह्म अयमात्मा ब्रह्मः सोऽयमात्मा चतुष्पात्" [१३] इति।

तत्र आत्मनः द्वितीयपादरूपेण स्वप्नस्थानः निरूपितः। सः स्वप्नस्थानः एव आन्तःप्रज्ञः वाह्यार्थज्ञानवासनामयार्थप्रज्ञानात्। अस्य स्वप्नस्थानस्य अवयवरूपेण सप्ताङ्गः एकोनविंशतिमुखः स्वीकृतः। अतः "स्वप्नस्थानोऽन्तऽप्रज्ञः सप्ताङ्ग एकोनविंशतिमिखः प्रविविक्तभुक् तैजसो द्वितीयः पादः" [१४] इति।

वेदान्तदर्शने अपि स्वप्नावस्थायां यानि सूक्ष्मशरीराणि स्वीकृतानि तानि स्वप्नदशावयवानि, तानि एव तैजसरूपेण आलोचितानि। वेदान्तसारग्रन्थे सदानन्दयोगीन्द्राचार्येण कथितम्स्थि-"सूक्ष्मशरीराणि स्वप्नदशावयवानि लिङ्गशरीराणि"इति।

स्वप्नावस्थायाम् इन्द्रियाणां निष्कियत्वे सति पुरुशः न कर्महीनः श्वासप्रश्वासक्रियात्वात्। उपनिषदि स्वप्नावस्था अग्निहोत्रयागसदृश्या निर्णिता। अग्निहोत्रयागात् यथा यजमानः इष्टफलं लभते तथा मन आख्यः यजमानः स्वप्नवृत्तिरूपादपि सुषुप्तिकाले स्वर्गस्थानीयम् अक्षरं ब्रह्मानम् आप्नोति। अयः उपनिषदि- "यदुच्छवासनिःश्वासावेतावाहुनी समं नयतीति स समानः। मनोः ह वाव यजमान इष्टफलमेव उदानः। स एतं यजमानमहरहर्ब्रह्म गमयति" [१५] इति।

**दर्शनशास्त्रे स्वप्नः**

वेदान्तदर्शने ब्रह्मः जगत् चेति तत्त्वद्वयं प्रसिद्धम्। तत्र ब्रह्मभिन्नः अखिलप्रपञ्चः अज्ञानस्य परिणामः इति। समष्टिव्यष्टिभेदेन अज्ञानं द्विविधम्। तत्र समष्टिसूक्ष्मशरीरोपहितेन चैतन्यं हिरण्यगर्भः, व्यष्टिसूक्ष्मशरीरोपहितेन चैतन्यं तैजस इत्युच्यते। तत्रापि एव स्वप्नस्थानः। वस्तुतः परमात्मा निष्क्रियः निर्गुणश्च। सृष्ट्यार्थम् आदौ सः हिरण्यगर्भरूपेण विवर्तितः सन् सृष्ट्याः अध्यक्षः। अतः उपनिषदि उवाच- "हिरण्यगर्भं जनयामास पूर्वम्" [१६] इति। ऋग्वेदे अपि श्रूयते- "हिरण्यगर्भः समवर्त्तताग्रे" [१७] इति। स्वप्नावस्थायां यौ हिरन्यगर्भतैजसौ तौ सृष्टेः मानसिकपर्यायः। तत्रैव सूक्ष्मविषयमनुभवः। अतः वेदान्तसारग्रन्थे सदानन्दयोगीन्द्रेण उक्तम्-"एतौ सूत्रात्मतैजसौ तदानीं सूक्षाभिः मनोवृत्तिभिः सूक्ष्मविषयान् अनुभवतः" [१८] इति।

अपिच- "प्रविविक्तभुक्.तैजसः" इति। अव्याकृतप्रकृतिविराजोः सन्ध्यवस्था स्वप्नस्थानः। अतः उपनिषदि आम्नातम्- "स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा। उत्कर्षादुभयत्वाद्वोत्कर्षति" [१९] इति।

वृहदारण्यकोपनिषदि अपि इहलोकपरलोकयोः सन्ध्यस्थानः स्वप्नः इति स्वीक्रियते। अत्रैव सूक्ष्मप्रपञ्चशरीराणां लयस्थानम्। सः स्वप्नस्थानः इहलोकात् परलोकगमनाय तथा आत्मज्ञानार्थं द्वारमेव।

**उपसंहारः**

वास्तविकजगति यः स्वप्नः मिथ्याभूतः सः एव स्वप्नः उपनिषदि हिरस्ण्यगर्भतैजसरूपेण प्रतिपाद्यते। यः पुरुषः स्वप्नदशायाः तैजसं तथा हिरण्यगर्भं जानाति सः एव ब्रह्मविद्याधाराम् आप्नोति, देहबन्धादात्मनं च उद्धरति। तस्य कूलजातः पुरुषः अपि ब्रह्मविद् भवति। अतः उपनिषदि श्रूयते-

"उत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्तति
समानश्च भवति नास्याब्रह्मविद्कुले भवति य एवं वेद।।" इति।

**सन्दर्भ**


1. सृष्टिसूक्तम्(१०/१९०/२)
2. प्रश्नोपनिषद् ४/५
3. तदेव ४/२
4. माण्डूक्योपनिषदि श्रीरङ्ग्रामानुजभाष्यम् ४
5. आत्मानात्मविवेकः
6. प्रश्नोपनिषद् ४/५
7. श्रुत्यर्थबोधिनीटीका
8. पञ्चीकरनम्
9. ऐतेरेयोपनिषद् २/३/१२
10. अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्यिभयान् पाप्मन आनन्दांश्च पश्यति।– वृहदारण्यकोपनिषद् ४/३/९
11. तदेव ४/३/२१
12. तदेव ४/३/२२
13. माण्डूक्योपनिषद् २
14. तदेव४
15. प्रश्नोपनिषद् ४/४
16. श्वेताश्वतरोपनिषद् ३/४
17. ऋग्वेदः(१०/११२/१)
18. माण्डूक्योपनिषद् ४
19. तदेव १०
20. उपनिषद्, संपा. अतुलचन्द्र सेन, हरफप्रकाशनी, कलकाता-०७,१९८०।
21. ऋग्वेद(९-१० मण्डल), महर्षि दयानन्दसरस्वती, सार्वदेशिक आर्यप्रतिनिधि सभा महर्षिदयानद भवन, रामलीला मैदान, नई दिल्ली-०२, २०००।
22. ऐतेरयोपनिषद्, गीता प्रेस, गोरखपुर।
23. मुण्डक-माण्डूक्यओपनिषदौ(उपनिषद् ग्रन्थमाला-५-६), पूपलेखा प्रेस, कलिकाता ५, १९७२।
24. वेदन्तसार, श्रीसदानन्द, चौखम्बा विद्याभवन, वाराणसी 221001, 1990।
25. श्वेताश्वतरोपनिषद्,गीता प्रेस, गोरख्पुर।